आकाशवाणी

**दिनाङ्कः  09.09.25** **सायम् - 06:20**

**मुख्यवार्ताः**

- **नेपालस्य प्रधानमन्त्री के. पी. शर्मा ओली इत्येषः सामाजिक-सञ्जाल-प्रतिषेधप्रकरणे विरोध-प्रदर्शनान्तरं स्वपदात् त्यागपत्रं प्रायच्छत् ।**
- **भारतसर्वकारः नेपाले सामान्यस्थितिं यावत् भारतीयनागरिकान् नेपालस्य यात्रां न कर्तुं सञ्चेतनां प्रायच्छत्।**
- **प्रधानमन्त्रिणा पञ्जाब-हिमाचलप्रदेशयोः जलाप्लवस्य समीक्षा कृता षोडशः-शत-कोटिरूप्यकाणां साहाय्यराशिः च उद्घोषिता ।**
- **उपराष्ट्रपति-निर्वाचनाय मतदान-प्रक्रिया संपन्ना जाता सम्प्रति मतानां गणना प्रवर्तते ।**

**नेपाल-प्रधानमन्त्री-ओली**

नेपालस्य प्रधानमन्त्री के. पी. शर्मा ओली इत्येषः स्वपदात् त्यागपत्रं प्रायच्छत् । यदा शतशः प्रदर्शनकारिणः तस्य कार्यालयं प्रविश्य सर्वकारं विरुद्ध्य उद्घोषणं कृतवन्तः तदा ओलीवर्यस्य त्यागपत्रम् आगतम्। सामाजिक-सञ्जाल-माध्यमेषु सर्वकारस्य प्रतिबन्धं विरुद्ध्य विरोध-प्रदर्शनानां समये जातानां मृत्यूनाम् उत्तरदायित्वं सुनिश्चितं कुर्वन्तः विरोधिनः बालकोट-क्षेत्रे ओलि-वर्यस्य व्यक्तिगत-निवासं भस्मीभूतं कृतवन्तः। युवान्दोलनकारिणः काठमाण्डू-उपत्यकायां अन्येषु मण्डलेषु च राजनैतिकनेतृणां मन्त्रिणां निवासस्थानानि लक्ष्यीकृत्य शिलाप्रहारं कृत्वा सम्पत्तिं अज्वालयन्। ललितपुरे सञ्चार-सूचना-तन्त्रज्ञान-मन्त्रिणः पृथ्वी-सुब्बा-गुरुङ्ग इत्यस्य गृहम् अपि प्रदर्शनकारिणः भस्मीभूतं कृतवन्तः। उपप्रधानमन्त्रिणः वित्तमन्त्रिणः च बिष्णु-पौडेल-वर्यस्य भाईसेपति इत्यत्र अपि प्रदर्शकारिणः शिलाप्रहारं कृतवन्तः। पूर्वगृहमन्त्रिणः रमेश-लेखकः इत्यस्य गृहे अपि आक्रमणं जातम्, यः ह्यः त्यागपत्रं दत्तवान्। प्रदर्शनकारिणः पूर्वप्रधानमन्त्रिणः नेपालीकाङ्ग्रेस-अध्यक्षस्य च शेर-बहादुर-देउबा इत्यस्य बुधनीलकण्ठ-गृहं प्रति आगच्छन्, परञ्च तेषां प्रवेशं तत्र निषिद्धम् । सि. पि. एन्. इत्यस्य अध्यक्षस्य, पूर्वप्रधानमन्त्रिणः विपक्षस्य मुख्यनेतुः च पुष्पकमल्-दहाल् इत्यस्य खुमाल्तार्-निवासे प्रदर्शनकारीभिः शिलाप्रहारः कृतः। काठ्मण्डू-ललितपुर-भक्तपुर-जनपदानां विभिन्नेषु क्षेत्रेषु अधिकारिणः कर्फ्यू इति निषेधाज्ञां प्रख्यापितवन्तः।

**एयरलाइन-काठमांडूः**

सर्वकार-विरुद्ध-प्रदर्शनानां मध्ये काठमाण्डू-नगरस्य विमानस्थात्रं पिनद्धम् । एयर-इण्डिया , इंडिगो चेत्यादिभिः सह अनेकाः विमानयात्रासेवा-प्रदातृ-संस्थानैः दिल्ली-काठमांडू-नगरयोः मध्ये स्वकीयाः विमानयात्रासेवाः निषिद्धाः । एयर-इण्डिया इत्यनेन एकस्मिन् वक्तव्ये प्रोक्तं यत् वर्तमान-परिस्थितिम् अवलोक्य दिल्ली-काठमाण्डू-नगरयोः मध्ये प्रवर्तमानाः विमानयात्रासेवाः अद्य यावत् निषिद्धाः । इंडिगो इत्यनेन अपि समाना एव घोषणा कृता अस्ति। काठमांडू-प्रति गम्यमानानि विमानानि साम्प्रतं स्थगितानि सन्ति । संस्थानेन प्रभाविताः यात्रिणः परामृष्टाः यत् ते यात्रां पुनर्निर्धारितं कर्तुं आधिकारिक-वेबफलके रिफ़ंड इत्यस्य आवेदं कुर्युः ।

**पञ्जाब - पीएम**

प्रधानमन्त्रिणा श्रीनरेन्द्र-मोदिना हिमाचल-प्रदेशस्य जलाप्लाव-प्रभावितक्षेत्राणां समीक्षा कृता प्राकृतिकापत्प्रभावित-जनैः सह स्थातुं केंद्रस्य प्रतिबद्धता पुष्टीकृता । हिमाचल-प्रदेशे स्वकीयायाः यात्रायाः आरम्भं कुर्वन् प्रधानमन्त्री भीषण-वृष्टिपातेन भूस्खलनेन च जातायाः हानेः आकलनं कृतवान् । सः हिमाचलप्रदेशस्य शीर्षाधिकारिभिः सह समीक्षोपवेशनं च कृत्वा प्रवर्तमानानां सहायोद्धारकार्याणां समीक्षाम् अकरोत् सहैव प्रधानमन्त्री जलप्लावेन पीडितैः जनैः , एनडीआरएफ-एस्-डी-आर-एफ् इत्यनयोः सहायोद्धारकार्य-कुर्वद्भिः च सह सम्वादम् अकरोत् । अनन्तरं सः पञ्जाबे जलाप्लव-प्रभावित-क्षेत्राणां वायु-सर्वेक्षण करिष्यति । प्रधानमन्त्री मोदिवर्यः जलप्लावस्य स्थितिं विज्ञातुं पञ्जाबस्य पठानकोटनगरं सम्प्राप्तवान् पञ्जाबस्य शीर्षाधिकारिभिः सह समीक्षोपवेशनं च कृतवान् । प्रधानमन्त्रिणा पञ्जाबस्य जलप्लावितपीडितेभ्यः सहायतायै षोडशः-शत-कोटिरूप्यकाणां साहाय्यराशिः उद्घोषिता ।

**उपराष्ट्रपति-निर्वाचनम्**

उपराष्ट्रपति-निर्वाचनाय मतदान-प्रक्रिया अधुना एव संपन्ना जाता । मतदानं प्रातः दशवादनतः समारभ्य सायं पञ्चवादनं यावत् प्रवर्तितम् । मतानां गणना अधुना प्रवर्तते । उपराष्ट्रपति-निर्वाचनाय निर्वाचनद्वन्द्वः एनडीए-दलस्य प्रत्याशिनः महाराष्ट्रस्य राज्यपालः सीपी राधाकृष्णन इत्यस्य इंडिया-दलस्य प्रत्याशिनः उच्चतमन्यायालयस्य पूर्व-न्यायाधीशः बी सुदर्शन-रेड्डी इत्यस्य च मध्ये च अस्ति । संसदः द्वयोः सदनयोः सदस्यैः भारतस्य अग्रिमाय उपराष्ट्रपति-निर्वाचनाय मतदानं कृतम् । प्रधानमंत्री नरेंद्रमोदीवर्यः , मतदातृषुः प्रथमः सदस्य आसीत् ।

**सेना-रूसाभ्यासः**

श्वः रशियादेशे आरभ्यमानस्य बहुपक्षीय-संयुक्त-सैन्य-अभ्यासे ZAPAD -2025 इत्यस्मिन् भागं ग्रहीतुं भारतीय-सशस्त्र-बलस्य एकं दलम् अद्य रूसं प्रति प्रस्थितम्। सप्तदिवसीयस्य अस्य अभ्यासस्य उद्देश्यं सैन्यसहयोगं वर्धयितुं, अन्तर-सक्रियतां वर्धयितुं, सहभागिसेनाभ्यः पारम्परिक-युद्धक्षेत्रे तथा आतङ्क-प्रतिरोध-क्षेत्रेषु तन्त्राणां, तन्त्र-प्रक्रियानां च आदानप्रदानाय मञ्चं प्रदातुं अस्ति। एकस्मिन् वक्तव्ये, रक्षामन्त्रालयेन सूचितं यत् भारतीयसेनायाः दलस्य नेतृत्वं कुमाऊँ-रेजिमेण्ट् इत्यस्य सैन्यबलस्य अन्य-सशस्त्रसेवानां च सैनिकाः करिष्यन्ति ।

**इसरो-अध्यक्षः**

इसरो इत्यस्य अध्यक्षः वी. नारायणन् इत्येषः प्रोक्तवान् यत् सिंदूराभियानस्य अवधौ, सर्वैरपि भारतीयोपग्रहैः चतुर्विंशति-होरासु कार्यं कृतम् आवश्यकताः च यथासम्भवं पूरिताः । नवदिल्ल्यां एकं कार्यक्रमं सम्बोधयन् , श्रीनारायणन्-वर्यः प्रकाशितवान् यत् कथं इसरो इत्यनेन भारतस्य तान्त्रिकी-पक्षं सुदृढीकृत्य , स्थानीयकरणं प्रौद्योगिक्याः हस्तांतरणं च वर्धते, अपि च देशं वैश्विकांतरिक्ष-नेतृ-रूपेण स्थापितं कर्तुं अन्तरिक्षोद्यमितां प्रचाल्यते । कार्यक्रमं सम्बोधयन् , सेना-प्रमुखः जनरल उपेंद्र-द्विवेदी-वर्यः प्रकाशितवान् यत् कथं भारतस्य सशस्त्र-बलानि सुरक्षां राष्ट्रीयात्मनिर्भरतां च वर्धयन्ति स्वदेशस्य रक्षोत्पादनं, निर्यातः, नवाचारः इत्येतेषां माध्यमेन विकासोन्मुखं भवन्ति ।

**दिल्ली-यमुना**

दिल्ल्याः मुख्यमंत्री रेखा-गुप्ता अद्य प्रोक्तवती यत् यमुना-नद्याः जलस्तरस्य अपचित्यानन्तरं , दिल्लीसर्वकारः जनानां स्वकीयेषु गृहेषु पुनर्वासं कारयितुं सर्वाः अवश्यक-सुविधाः प्रदास्यति । नवदिल्ल्यां प्रसारमाध्यमैः सह वार्तां कुर्वती दिल्ल्याः मुख्यमंत्री प्रोक्तवती यत् ये कृषकाः हानिं सम्मुखीकृतवन्तः तेभ्यः सहायोद्धार-राशिः प्रदास्यते । सा प्रोक्तवती यत् दिल्ली-सर्वकारः जनानां सहायतायै सर्वाः आवश्यक्यः व्यवस्थाः सज्जाः च कर्तुं प्रतिबद्धः अस्ति ।

**जयशङ्करः-सम्वादः**

विदेश-मंत्री डॉ. एस जयशंकर अद्य तृतीयस्य ग्लोबल-साउथ-यंग-डिप्लोमैट्स्-फोरम इत्यस्य प्रतिभागिभः सह सम्वादम् अकरोत् । एकस्मिन् सञ्जालीय-सन्देशे , डॉ. जयशङ्करेण तयोः भावनैक्ययोः विषये प्रतिपादितं याभ्यां वैश्विक-दक्षिण-लक्ष्याणि अग्रे वर्ध्यन्ते ।

**जयशंकर-मैक्सिकन-राजदूतः**

विदेश-प्रकरणस्य मन्त्री डॉ एस् जयशंकरः अद्य आमन्त्रिते एकस्मिन् सेवावसान-समारोहे मैक्सिकन-राजदूतेन फेडेरिको-सालास इत्यनेन सह मेलनं कृतवान् । डॉ. जयशंकरेण एकस्मिन् सञ्जालीय-सन्देशे प्रोक्तं यत् सः भारत-मेक्सिको-देशयोः मध्ये सम्बन्धान् सुदृढं कर्तुं श्री-सालासवर्यस्य योगदानं प्रशंसितवान् । डॉ. जयशङ्करेण मैक्सिकन-राजदूत-वर्याय भविष्यस्य कुशलप्रयासेभ्यः शुभकामनाः प्रदताः ।

**इज़राइल-गाजा-उद्धारकार्यम्**

इज़रायलदेशस्य सेनया गाजानगरस्य सर्वान् निवासिनः यथाशीघ्रं नगरात् अन्यत्र गन्तुम् आदेशः प्रदत्तः यतः हि सेना अस्मिन् क्षेत्रे भीषणबलेन सह कार्यसम्पादनस्य योजनां रचयति। इज़राइल-रक्षा-बलानाम् अरबी-भाषा-प्रवक्ता गाजा -नगरस्य प्रतिवेशिक्षेत्रेषु अवस्थितान् नागरिकान् सुरक्षितक्षेत्राणि प्रति स्थानांतरितं भवितुम् आग्रहम् अकरोत् । अनेकैः विश्व-नेतृभिः अस्याः योजनायाः निंदा कृता अस्ति , संयुक्त-राष्ट्रेण अपि सञ्चेतना प्रदत्ता अस्ति यत् अनया योजनया बृहद्रूपेण अधिकाधिकानां नागरिकाणां विस्थापनं मृत्युः च भविष्यति ।

**॥ इति वार्ताः॥**